# સર્જકતાનાં મેઘધનુષી શિખરો

(આધુનિક સંસ્કૃત સાહિત્ય : ડૉ. હર્ષદેવ માધવની કૃતિઓના પરિપ્રેક્ષ્યમાં)







: સમ્પાદકો :

પ્રા. ડૉ. ઉર્વી પી. દવે • પ્રા. ડૉ. દક્ષા કે. જોષી • સુશ્રી ઉર્વશી એચ. સોલંકી

Scanned with CamScanner

Sarjakatmaj Manjubhasini Sikhavo
(Dr. Harshdev Madhav Abhinandangranth)
Edited by
Prof. Dr. Urvi P. Dave • Prof. Dr. Daksha K. Joshi
Urvashi H. Solanki

ISBN : 978-93-5108-559-1

© [illegible]

પ્રકાશક :
બાબુભાઈ એચ. શાહ
પાર્શ્વ પબ્લિકેશન
૧૦૨, નંદન કોમ્પ્લેક્ષ, મીઠાખળી ગામની રેલવે ક્રોસિંગ પાસે,
અમદાવાદ-૩૮૦ ૦૦૬
ફોન : ૦૭૯-૨૬૫૬૪૮૦૦

•

પ્રથમ આવૃત્તિ : ૨૦૧૬
પ્રત : ૩૦૦
મૂલ્ય : રૂ. ૨૭૫-૦૦

•

લેસર ટાઈપસેટિંગ
ખુશ્બૂ ગ્રાફિક્સ
નંદન કોમ્પ્લેક્ષ, મીઠાખળી,
અમદાવાદ-૩૮૦ ૦૦૬

•

મુદ્રક :
શ્રી સ્વામિનારાયણ મુદ્રણ મંદિર
૧૨, શાયોના એસ્ટેટ, દૂધેશ્વર રોડ, શાહીબાગ,
અમદાવાદ-૩૮૦ ૦૦૪

Scanned with CamScanner

Scanned with CamScanner

# ४१. 'भाति ते भारतम्' - प्रतिकाव्यदर्शनम्

– डॉ. ललितः पटेलः

डॉ. रमाकान्तशुक्लमहोदयस्य "भाति ते भारतम्" काव्यम् आधुनिकसाहित्ये खलु सुप्रतिष्ठितं हृद्यं च वर्तते । "देशेऽस्मिन् अनेकदशवारं काव्यस्यास्य पाठः सञ्जातः, सहस्रशश्च सहृदयाः श्रोतारो भारतप्रेरणाप्रपूरितस्वान्ता अपि नूतनां भक्तिधारां स्वान्ते धारितवन्तस्तदिदं श्रुत्वेति न न्यूनं साफल्यं सत्कवेरस्य श्रीमतो डॉ. रमाकान्तशुक्लमहाभागस्य" इति कथयन्ति डॉ. शिवदत्तशर्मा चतुर्वेदः ।[१] "भाति ते भारतम्" प्रतिकाव्यमस्ति "भाति मे भारतम्" इत्यस्य । प्रतिकाव्यस्यास्य रचनाकारो वर्तते डॉ. हर्षदेवमाधवमहाभागः । तस्य मतानुसारं हास्य-व्यङ्ग्यकटाक्षमिश्रं निरूपणमेव प्रतिकाव्यस्यास्य हृदयमस्ति ।[२] वास्तवरञ्जितेन निरूपणेन, वक्रोक्तिवचनेनातिशयोक्तिदर्शनेन च काव्यमिदं समाजस्य विरूपतायाः चित्रं प्रस्तौति । तत्र कवेः विडम्बनैव कारणभूता इति मन्ये । राष्ट्रभावनां मनसि निधाय समाजजागृत्यै कर्तव्यपालनाय चास्माभिः रोगौषधम् अन्वेषणीयमिति भावो वर्तते डॉ. हर्षदेवमाधवमहाभागस्य । भारतगुणगानयुतानि काव्यानि नैकानि शोभमन्ते परं भारतस्य वास्तविकं चित्रं निरूपयन्ति काव्यानि विरलतया दृग्गोचरतां यान्ति । तादृशेषु काव्येषु अन्यतमं वर्तते-"भाति ते भारतम्" । इदं "भाति ते भारतम्" काव्यं प्रारम्भादेव मूलकाव्यस्य प्रतिघोषमभिव्यनक्ति । पश्यतु-

**विश्वबन्धुत्वमुद्घोषयत्पावनं विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।**
**विश्वमेकं कुटुम्बं समालोकयत् भूतले भाति मेऽनारत भारतम् ॥**

(भाति मे भारतम्-१)

**विश्वबन्धुत्वमुद्घोषयत्पावनं प्रान्तभाषाविभक्तञ्च धर्मादिभिः ।**
**स्वं गृहं वह्निना रोचयत्सन्ततं चीनपाकादिभीतं प्रियं भारतम् ॥**

(भाति ते भारतम्-१)

अस्मदीयत्वं प्रतिभाति "भाति मे भारतम्" काव्ये । युष्मदीयत्वं प्रतिभाति "भाति ते भारतम्" काव्ये । अनयोः काव्ययोः अस्मदीयत्व-युष्मदीयत्व-सम्बन्धः । अस्मदीयत्वदृष्टिकोणे भारतमिदं वेदच्छन्दस्सु प्रणीतम्, रामायणे वर्णितम्, महाभारते चित्रितम् पुराणेषु चर्चितमद्यावधिचानेकसहस्रनानाभाषप्रवीणकविवृन्दवर्णनसम्पूजितं वर्तते । युष्मदीयत्वदृष्टिकोणे भारतमिदं चीनपाकादिभीतं क्रियान्ययरहितं, रामायणेन जीविकाशवस्त्रादियुतं, लुब्धपण्डाधार्मिकवञ्चितं, उल्लुभिर्लल्लुभिः शोभितं,



Scanned with CamScanner

Scanned with CamScanner

रोगिभिर्भोगिभिर्व्याकुलं नित्यमासन्दिकालोलुपं चित्रितम्। "तावकं भारतं भूतले विभाति" इत्यस्य व्यङ्ग्यमेव समाजविरूपताम् अभिव्यनक्ति। "मामकं भारतं भूतले विभाति" इत्यस्य व्यङ्ग्यमेव भारतगौरवमभिव्यनक्ति। अनेन मामक-तावक-सम्बन्धः। इह यद्यपि नास्ति कवेः व्यक्तिविशेषं, जातिविशेषं, धर्मविशेषं प्रति द्वेषः अपि तु तस्य पुण्यप्रकोपः विडम्बना वा दरीदृश्यते सम्पूर्णे काव्येऽस्मिन्। इयं विडम्बना-चिन्ता वर्तते सामान्यजनस्य राष्ट्रभक्तस्य वा। अयमेवाशयो भवेद् रचनाकारस्यापि, तत्र नास्ति काचिद् विप्रतिपत्तिः। अनयोः काव्ययोः ध्येयं वर्तते 'राष्ट्रप्रेम'। एकस्य गौरवप्रदर्शनेन इतरस्य तु विडम्बनादर्शनेन। प्रतिकाव्यस्य विषयाः स्पष्टतया चारूताचर्चिताः सत्यप्रदिपादकाः समस्याप्रदर्शकाश्च सन्ति। पश्यतु त्रासवादचित्रणम् -

**राविडी-लालु-मायावती-मण्डितं फुल्लदेवी-मुलायम्-स्वरैर्गर्जितम्।**
**तर्जितं त्रासवादेन संसदगृहं गान्धि-मार्गाच्च्युतं कीदृशं भारतम्॥**

यत्र विद्वांसः कवयश्च हन्यन्ते किन्तु सिनेतारकाः क्रीडकाश्च मण्डिताः भवन्ति। योजनाः कर्गजेषु, निर्वाचने वचनानि, गान्धिनाम्ना दम्भप्रदर्शनम्, शान्तिप्रधानलोकवृन्देषु मूढताऽऽलस्यं दीनता च, हीनाः मन्त्रिश्वराश्च शोभन्ते यस्मिन् भारते, तत्तु भारतं भूतले भाग्यहीनं विभाति।

**शिक्षिता वृद्धुदाभा नु याता लयं यत्र विद्वान् कविश्चामरो हन्यते।**
**कीर्तिद्रव्यं सिनेतारकैर्लभ्यते खेल-क्रीडारतं जीर्णकं भारतम्॥५६॥**
**फालक-क्रीडका विश्रुता मण्डिताः सर्वविज्ञापनैः साधुवादैर्धनैः।**
**विस्मृताः सैनिका देशरक्षाकराः किन्तु पृथ्व्यामिदं भारते भारतम्॥५९॥**

इत्यते श्लोकाः अस्मद्राष्ट्रस्य प्रजातन्त्रविडम्बनां, भङ्गिभणित्या वक्रोक्तिविच्छित्त्या कटाक्षपूर्वकं विज्ञाप्य 'शीलं परं भूषणम्' इत्यस्य स्थाने 'अशीलं परं भूषणम्' इति मान्यतां प्रतिपादयन्ति। नास्त्यत्र तिरस्कारस्य भावो रचनाकारस्य। समाजजागृत्यै तानि दूषणानि दूरीकर्तुं इङ्गितं कृत्वा कर्तव्यपालनाय प्रेरयति कविरयम्। देशस्य वर्तमानदशा चित्रिता काव्येऽस्मिन्। एतादृशी वर्तमानदशा 'भाति मे भारतम्' काव्येऽपि चित्रिता -

**सज्जनान् दुर्गतान् दुर्जनान् सद्गतान् मानिता वारनारीर्विपन्ना वधूः।**
**वीक्ष्य चित्तं कवेर्विव्यथे यत्र तद् भूतले भाति मेऽनारतं भारतम्॥७८॥**
**दुःखदावानलैर्दग्धदेहान्भरान् क्षुत्पिपासाकुलान् वृत्तिकष्टार्दितान्।**
**वीक्ष्य कारुण्यपूर्णा नरा यत्र तद् भूतले भाति नेऽनारतं भारतम्॥७९॥**

काव्यकलायां या शक्तिः वा प्रतिभा, तया कविः सर्वं विषयं विवर्णयितुं शक्नोति। इदं हि 'भाति ते भारतम्' प्रतिकाव्यमपि काव्यत्वश्रिया विद्योत्यमानमवाप्यते।



Scanned with CamScanner

Scanned with CamScanner

वयं कीदृशाः मानवाः सन्तः अपि दानवाः, सज्जनाः सन्तः, असज्जनाः, धनवन्तोऽपि दारिद्र्यवन्तः, बलवन्तोऽपि नैर्बल्यवन्तः, योगिनोऽपि भोगिनो जाताः, येन स्वस्य देशस्य गरिमा भञ्जिता । काव्यमिदमीदृशमेव-

**स्नेहसंवर्धिता लालिताः पालिताः, सौख्यदानेन वृक्षैर्धृता मानवाः ।**
**ते कुठारैः सदा नाशिताः पादपाः स्वार्थमग्नं परैर्हन्यते भारतम् ॥७४॥**
**यस्य वात्सल्यभावेन पूर्णं शुभं ग्राम-ग्रामे गृहं वा पुरे सर्वदा ।**
**प्रेषिता वृद्धलोका हि वृद्धाश्रमं मातृदेवो भवति भ्रमो भारते ॥७५॥**

वयं प्रजातान्त्रिकनीतिषु, कार्यपालिकासु, न्यायालयेषु, सार्वजनिकप्रतिष्ठानेषु च यद्राजकारणं संस्कृत्याश्च पाश्चात्यीकरणं कृतवन्तः । पारिवारिक भावनाह्रासोऽपि तेन जातः । नार्यः यत्र पूज्यन्ते स्म तासामुच्छृंखलावशात् का स्थितिरियम्-

**यत्र नारीजनोऽसौ विवादे रतः वेल्लनीं वापि चित्वा च सम्मार्जनीम् ।**
**हस्तपादप्रहारैः नमन्ति पतिं प्रीतियुद्धातुरं तावकं भारतम् ।**
**धूमवर्त्या तथा मद्यपानेन वै स्वैरिणी दर्शयन्ती प्रभुत्वं गृहे ।**
**क्रोधपूर्णा चपेटां ददात्येव सा स्वामिने-सभ्यता पश्चिमा भारते ॥७९॥**

स्वातन्त्र्योत्तरं शनैः शनैः विकासव्याजेन ये नूतनाः पन्थानः, कुकल्पिताः नीतयश्च अस्माभिः रचिताः, ताभिः दुर्नीतिभिः तैः दुर्मार्गैश्च नैतिकं पतनं जातं जायमानं च वरिवर्ति । इदृशे भारते शङ्करो श्मशाने सुखी भवेत् कोऽन्यो वा ? -

**पण्डिता नेतृगानेरताः पामराः 'टेंक' शस्त्रक्रये श्रूयते भ्रष्टता ।**
**नैव चोज्झन्ति भोगान् स्वयं साधवः संसदि व्याकुलं विह्वलं भारतम् ॥९॥**

विषयेषु शैक्षणिक-सांस्कृतिक-सामाजिक-प्राकृतिक-आध्यात्मिक-आर्थिकादिषु विषयेषु भारतस्य या यथार्थता-सत्यता वर्तते तद्रेखाचित्रं तच्छब्दचित्रम् उत्टङ्कितं "भाति ते भारतम्" काव्ये । सम्प्रदायवादः भाषाभाषीवादः जलविवादः क्षेत्रवादः जातिवादश्च भारते भीषणरूपेण सौहार्दतां विनाशयन्तः सन्ति ।

**मन्दिरैर्मर्मस्जिदैश्चैत्यगीर्जागृहैः वैरबीजान्वितैः कोमि-दावाननलेः ।**
**सम्प्रदायैर्हता शान्तिरेवास्ति भो ! मानवैर्दानवैर्लुञ्छितं भारतम् ॥७॥**
**जन्मभूमेर्विवादे स्थितो राघवो नैव कारागृहान्मुच्यते माधवः ॥८-अ॥**

अनेन भारतस्य व्यावहारिकं रूपं, लौकिकं रूपं, वर्तमानरूपं च दिग्गोचरं जायते । कविः स्वप्रतिभया याथार्थ्यं वस्तुचित्रणं काव्यसौन्दर्येन प्रत्यक्षीकृत्य स्पष्टतया च हास्य-व्यङ्ग्य-कटाक्षेन स्वकीयं वैशिष्ट्यं प्रतिपादयति । एकैकः श्लोको वर्ण्यं कृत्स्नं



Scanned with CamScanner

वैशिष्ट्यमस्माकं समक्षे निदधाति। सुरगिरारचिताः १०४ श्लोकाः स्वतन्त्ररूपेण मुक्तकानि भवितुमर्हाः। भारतदुर्दशाचित्रणसाहसमेव कवेः विलक्षणतामभिव्यनक्ति, नास्त्यन्यत्र यत्।

अधीत्योद्वदनीभूतो "भाति मे भारतं" शुभम्।
"भाति ते भारतं" ज्ञात्वा लज्जानम्राननोऽस्म्यहम् ॥[3]

---

सन्दर्भाः

१. "भाति मे भारतम्"-काव्यदर्शनम् इति लेखः, डॉ. रमाकान्तशुक्लमहाभागः, 'भाति ते भारतम्', देववाणी-परिषद् दिल्ली, पृ. ११४

२. "भाति ते भारतम्"-"पुनरपि नवेन पथा"-इत्यत्रोक्तं कथनम्

३. स्वरचितश्लोकः

---


सन्दर्भग्रन्थाः

१. भाति मे भारतम्-डॉ. रमाकान्तशुक्लः-देववाणी-परिषद्-दिल्ली

२. भाति ते भारतम्-डॉ. हर्षदेवमाधवः


---


सहायकाचार्यः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्)





Scanned with CamScanner